# ॥ वाल्मीकि रामायण॥

## ५ सुन्दरकाण्ड

### अध्याय २९

एवं बहुविधां चिन्तां चिन्तयित्व महाकपिः ।
संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह ॥१॥

राजा दशरथो नाम रथकुञ्जरवाजिनाम् ।
पुण्यशीलो महाकीर्तिरृजुरासीन्महायशाः ।
चक्रवर्तिकुले जातः पुरन्दरसमो बले ॥२॥

अहिंसारतिरक्षुद्रो घृणी सत्यपराक्रमः ।
मुख्यश्चेक्ष्वाकुवंशस्य लक्ष्मीवाँल्लक्ष्मिवर्धनः ॥३॥

पार्थिवव्यञ्जनैर्युक्तः पृथुश्रीः पार्थिवर्षभः ।
पृथिव्यां चतुरन्तयां विश्रुतः सुखदः सुखी ॥४॥

तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः ।
रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम् ॥५॥

रक्षिता स्वस्य वृत्तस्य स्वजनस्यापि रक्षिता ।
रक्षिता जीवलोकस्य धर्मस्य च परन्तपः ॥६॥

तस्य सत्याभिसन्धस्य वृद्धस्य वचनात्पितुः ।
सभार्यः सह च भ्रात्रा वीरः प्रव्रजितो वनम् ॥७॥

तेन तत्र महारण्ये मृगयां परिधावता ।
जनस्थानवधं श्रुत्वा हतौ च खरदूषणौ ।
ततस्त्वमर्षापहृता जानकी रावणेन तु ॥८॥

यथारूपां यथावर्णां यथालक्ष्मीं विनिश्चिताम् ।
अश्रौषं राघवस्याहं सेयमासादिता मया ॥९॥

विररामैवमुक्त्वासौ वाचं वानरपुङ्गवः ।
जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता ॥१०॥

ततः सा वक्रकेशान्ता सुकेशी केशसंवृतम् ।
उन्नम्य वदनं भीरुः शिंशपावृक्षमैक्षत ॥११॥

सा तिर्यगूर्ध्वं च तथाप्यधस्तान्
निरीक्षमाणा तमचिन्त्य बुद्धिम् ।
ददर्श पिङ्गाधिपतेरमात्यं
वातात्मजं सूर्यमिवोदयस्थम् ॥१२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com